# शब्दब्रह्म स्फोटविचारश्च

प्रस्तुतकर्ता

डॉ. कुलदीपशर्मा

सहायकाचार्यः,

शिक्षाशास्त्रविभागः,

राष्ट्रियसंस्कृतसंस्थानम्, जयपुर–परिसरः, जयपुरम्

# तस्मै पाणिनये नमः



# शब्दब्रह्म

वागेव विश्वा भुवनानि जज्ञे।

द्वे ब्रह्मणि वेदितव्ये, शब्दब्रह्म परं च यत्।
शब्दब्रह्मणि निष्णातः, परं ब्रह्माधिगच्छति।।

मैत्रायणी–उपनिषद्, प्रपाठकः–६, कण्डिका–२२

वेदाः प्रमाणं लोकानां ते वेदाः पृष्ठतः कृता।
द्वे ब्रह्मणि वेदितव्ये, शब्दब्रह्म परं च यत्।
शब्दब्रह्मणि निष्णातः, परं ब्रह्माधिगच्छति।।

महाभारतम्, शान्तिपर्व, १/२३२/३०

# शब्दब्रह्म

अनादिनिधनं ब्रह्म, शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।

वाक्यपदीयम्, १

सूक्ष्मामर्थेनाप्रविभक्ततत्त्वामेकां वाचमभिष्यन्दमानाम्।
उतान्मे विदुरन्यामिव च एनां नानारूपामात्मनि सन्निविष्टाम्।।

शतपथब्राह्मण

मूलाधारे पराख्या पवनजवबलाद् व्यञ्जिता नाभिदेश।
पश्यन्तीति प्रसिद्धा तदनुहृदिगता मध्यमाख्यां दधाना।।
ख्याताभूत् वैखरीति श्रवणपुटगता यार्थबोधे प्रवीणा।
वीणावाद्येऽवत्तीर्णा प्रसरतु भुवने सैव गीर्वाणवाणी।।

# स्फोटाख्यं ब्रह्म

स्फोटात्मकं प्रणववैकृतिरूपमेतत्, तत्त्वं समादिशति यच्च जगद्विवर्त्तम्।।
शब्दार्थबन्धमखिलं किल यद्विधत्ते, वन्दे तदेव पथि पाणिनिशब्दशास्त्रम्।।

अण्डभावमिवापन्नो यः क्रतुः शब्दसंज्ञकः।
वृत्तिस्तस्य क्रियारूपा भागशो भजते क्रमम्।।

वाक्यपदीयम्, ५१

शब्दब्रह्म यदेकं यच्चैतन्यं च सर्वभूतानाम्।
यत्परिणामस्त्रिभुवनमखिलमिदं जयति सा वाणी।।
स एष जीवो विवरप्रसूतिः प्राणेन घोषेण गुहां प्रविष्टः।
मनोमयं सूक्ष्ममुपेत्यरूपं मात्रास्वरो वर्ण इति स्थविष्ठः।।

श्रीमद्भागवद् पुराण–११/१२/१७




परा वाङ् मूलचक्रस्था, पश्यन्ती नाभिसंस्थिता।

हृदिस्था मध्यमा ज्ञेया, वैखरी कण्ठदेशगा।। इति।

वैखर्या हि कृतो नादः परश्रवणगोचरः।

मध्यमया कृतो नादः स्फोटव्यञ्जक उच्यते।।

ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लभ्यते।
अल्पो महाँश्च केषाञ्चिदुभयं तत्स्वभावतः।।

महाभाष्यम्, १/१/७०

स्फोटस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते।
वृत्तिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते।।
शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदे तु वैकृताः।
ध्वनयः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते।।

वाक्यपदीयम्, १/७७

वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति मतस्थितिः।
साधुशब्देऽन्तर्गता हि बोधका न तु तत्स्मृताः।।

वैयाकरणभूषणसारः, ६१

# Stages of Speech

- • Vaikhari –Elaborated, Expressed
- • Madhyama -Mediating
- • Pashyanti –Seeing, witnessing
- • Para –Transcendental (term not used in VP)

वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम् ।

अनेकतीर्थभेदायास्त्रय्या वाचः परं पदम् ॥

- This is the amazing, supreme abode of speech, manifesting as vaikhari, madhyama, and pashyanti, and divided in multifarious ways.

# स्फोटभेदाः

तत्र वर्णपदवाक्यभेदेन स्फोटस्त्रिधा। तत्रापि जातिव्यक्तिभेदेन पुनः षोढा। अखण्डपदस्फोटोऽखण्डवाक्यस्फोटश्चेति सङ्कलनयाऽष्टौ स्फोटाः।

| | |
|---|---|
| 1. | वर्णस्फोटः |
| 2. | पदस्फोटः |
| 3. | वाक्यस्फोटः |
| 4. | वर्णजातिस्फोटः |
| 5. | पदजातिस्फोटः |
| 6. | वाक्यजातिस्फोटः |
| 7. | अखण्डपदस्फोटः |
| 8. | अखण्डवाक्यस्फोटः |

नैयायिकानां मते शब्दः अनित्यः आकाशस्य गुणः श्रोत्रग्राह्यश्च वर्तते। स च शब्दः द्विविधः – ध्वनिः शब्दरूपश्चेति। वर्णानां समूहः पदम्। वर्णसमूहात्मकं पदमेव वाचकं भवति। पदसमूहश्च वाक्यं भवति। वाक्ये काचित् शक्तिः नैयायिकैः नैव स्वीक्रियते। मीमांसानुसारेण वर्णा एव शब्दः। ते च वर्णाः नित्याः विभवः ध्वनिव्यंग्याश्च भवन्ति। उभयत्रापि वैयाकरणसम्मतस्य स्फोटस्य खण्डनं क्रियते। शाब्दिकानां मते शब्दो द्विविधो भवति – ध्वनिरूपः स्फोटरूपश्चेति। तत्र ध्वनिरूपः शब्दः स्फोटस्य अभिव्यञ्जको भवति। स्फोटरूपः शब्दः ध्वन्यभिव्यक्तः सन् अर्थबोधकश्च जायते। एष स्फोटरूपशब्दः अखण्डः एको नित्यो विभुः ब्रह्मरूपश्च वर्तते। अस्य स्फोटस्य एकत्वेऽपि वर्णादिव्यञ्जकभेदेन अष्टौ भेदाः स्वीक्रियन्ते। तेषु च वाक्यस्फोट एव मुख्यो वर्तते।



# हार्दिको धन्यवादः

kailashtanvar@gmail.com